To

HIS HONOUR SIR JOHN PRESCOTT HEWETT,

K. C. S. I., C. I. E.,

Lieutenant-Governor of the United Provinces

AND

Chancellor of the University of Allahabad,

Etc., Etc., Etc.,

THIS VOLUME

IS WITH GRATEFUL ESTEEM

DEDICATED



PREFACE.

A FEW years ago while engaged in rendering into Sanskrit some passages from the master minds of England, with a view to improving my Sanskrit composition as well as to keep myself occupied usefully during my leisure hours I was struck by a selection of the proverbs of antiquity and quotations in English, which I happened to come across, on account of their depth, their universality, and the impressive character of the truth conveyed by them This led me to carry on the work of translation with some earnestness and look into the great store house of the proverbs, in order to select from out of them such as I might find useful as guides in practical life My selections have now swollen up to the size of a small book which I desire to place before the public They have stood by me in many of the difficulties of my life and as companions in solitude I however do not like to confine the usefulness of the collection to myself alone By publishing them I intend to place them before the public in

general and particularly in the hands of juvenile readers just entering the threshold of life who I hope would find in them so many solutions in their difficulties.

I have given this selection the appellation of *Hitokti* signifying thereby, that they are the salutary utterances of the great teachers of the past and are useful guides in practical life

FORT RÁMNAGAR }
January, 1910 }

PRABHU NÁRÁYANA

— ◦ —

हितोक्तिः ।

A bird in hand is worth two in the bush.

करस्थैकःपक्षी कुञ्जस्थपक्षिद्वयेनतुल्यः ।

A blind man will not thank you for a looking-glass.

अन्धो मुकुरं प्राप्य नोपकृतो भविष्यति।

A broken friendship may be soldered but will never be sound.

भग्नाया मैत्र्याः सन्धिर्यद्यपि भवेत् परन्तु सा दृढा न कदापि भवितुमर्हति।

A candle lights others and consumes itself

वर्तिरात्मानं भस्मसात्कुर्वती अन्यान्प्रकाशयति ।

A careless watch invites the vigilent foe.

प्रमत्तो यामिकः सावधानं रिपुमाह्वयतीव।

A clean hand wants no washing

मलहीनहस्तस्य धावनमनावश्यकम् ।

A debauched son of a noble family is a foul stream from a clear spring.

शुद्धाभिजने कदपत्यता स्वच्छजलस्रोतसो मलिनजलधारेव ।

A deceitful peace is more hurtful than open war.

प्रकटयुद्धापेक्षया कपटसन्धिर्हानायाधिकतरं भवति ।

A deluge of words and a drop of sense.

प्रवाहः शब्दानां प्रमेयस्य तु बिन्दुमात्रम् ।

A diamond is valuable, though it lies on a dunghill.

अवकरे स्थितोपि वज्रमणिर्महामूल्य एव ।

A dog will not cry, if you beat him with a bone.

अस्थ्ना ताडितः श्वा नैव वुक्किष्यति ।

A drowning man will catch at a rush.

निमज्जन्पुरुषस्तृणमप्यवलम्बते ।

A fault once denied is twice committed.

अनुष्ठितस्यापराधस्यानभ्युपगमो द्विगुणीकरोत्यपराधम् ।

A favour ill-placed is a great waste.

अस्थानकृतोपकारो महानपचयः ।

A few things gained by fraud destroy a fortune otherwise honestly won.

The unrighteous penny corrupts the righteous pound

अल्पमपिच्छललब्धं बहु सत्यार्जितमपि प्रदूषयति ।

सत्यार्जितोऽपि दीनारो दूष्येन्मिथ्यार्जितात्पणात् ।

A fool always finds a greater fool to admire him.

मूर्खाणां श्लाघिनो मूर्खतराः प्राप्यन्ते एव।

A fool's heart is in his tongue, but a wise man's tongue is in his heart.

जिह्वायां मूर्खहृदयं जिह्वा तु विदुषो हृदि ।

A good thing is appreciated more by its absence than its enjoyment.

अप्यभावे वस्तुनो न तु भोगे गुणग्रहः ।

A good dinner helps deliberation.

सुभोजनेन प्रतिभा नराणां परिवर्धते ।

A good man doubles the length of his life; to look back with pleasure on our past life is to double it.

साधुजनः स्वजीवितपरिमाणं द्विगुणयति ।
व्यतीतजीवितांशस्य हि सुखेन स्मरणं
आयुर्द्विगुणीकरणम् ।

A great fortune is a great slavery.

महाधनिकता महान्तं दासभावमावहति ।

A hasty man never wants woe.

अविमृश्यकारिणः शोकदारिद्र्यं नास्ति ।

A headstrong man and a fool may wear the same cap.

प्रमत्तमूर्खयोः समानं परिधानम् ।

A jest driven too far brings home hate.

सीमोत्क्रान्तः परिहासो जुगुप्सायां
परिणमते ।

A little pot is soon hot.

क्षुद्रं पात्रं तप्यते शीघ्रमेव ।

A liar should have a good memory.

अपेक्षणीया सततम्मिथ्यावक्त्रा स्मृतिः शुभा।

A liar is not believed when he speaks the truth.

मिथ्याभिभाषी सत्यमपि वदेच्चेन्न विश्वस्यते।

A little spark kindles a great fire

विस्फुलिङ्गान्महती ज्वाला उत्पद्यते।

Alas! by what trivial cause is greatness overthrown

"What mighty contests rise from trivial things"

Pope

क्षुद्रैरपि निमित्तैर्हि महत्वं नश्यते अहो।

"क्षुद्रेभ्योऽपि वस्तुभ्यो घोरयुद्धं भवेदहो।"

Alas! how difficult is it to preserve a high reputation

अहो क्लेशेन शक्यन्ते कीर्तयो रक्षितुं जनैः।

All things are easy that are done willingly

सर्वं श्रद्धया सुकरमस्ति।

All truth is not to be told at all times

सदैव सर्वं सत्यं न वाच्यम्।

All are not saints that go to church.

देवमन्दिरमुपस्थातारः सर्वे न साधवः ।

All between the cradle and the coffin is uncertain.

आजन्ममरणान्तं सर्वमनिश्चितम् ।

All complain of want of memory, but none of want of judgment.

सर्वे स्मृतिं दूषयन्ति न कोऽपि स्वविचारणम्।

All kinds of wood burn silently, except thorns, which crackle and call out, we too are wood.

काष्ठं ज्वलति निःशब्दं सकलं कण्टकान्विना।
कण्टकास्तु ज्वलन्त्युच्चैर्वदन्तो निज-
काष्ठताम् ॥

All's well that ends well.

परिणामे शुभं यस्य सततं शुभमेव तत् ।

A man may lose what are the clearest rights by not demanding them.

स्थापयेन्नाधिकारं चेन्न्याय्योऽप्यर्थो विन-
श्यति ।

A man's reception is according to his coat, his dismissal according to his sense.

वेषोचितं स्वागतं स्याद्बुद्धेर्योग्यं विसर्जनम् ।

A man who does nothing never has time to do anything

न कर्त्तुं समयस्तस्य कुरुते यो न किञ्चन ।

A man in power once becoming obnoxious, his acts good or bad, will work out his ruin.

"When a man is not liked whatever he doth is amiss."

अधिकृतः पुरुषः सकृदपि परपीडाकरो ज्ञातस्तदा कर्माणि साधून्यसाधूनि वा तस्य हानिहेतवो भवन्ति ॥

"यत्करोति घृणार्हस्तत्सर्वमेत्र हि निन्दितम् ।"

A man who is most slow in promising is most sure to keep his words.

चिरेण प्रतिजानानः प्रतिज्ञां पालयेद्ध्रुवम् ।

A miser's son is generally a spendthrift.

कृपणस्य सुतः प्रायो व्ययशीलः प्रजायते ।

A position of dignity is more easily improved upon than acquired.

प्रतिष्ठा दुर्लभा लोके सुखेनास्याः समुन्नतिः ।

A penny saved is a penny gained.

वित्तस्य रक्षा लाभो हि सुमहान्परिकीर्तितः ।

A soft answer turneth away wrath.

वचोभिर्मधुरैः क्रोधः सुमहानपि शाम्यति ।

A servant is known by his master's absence

स्वामिनः पारोक्ष्ये भृत्यगुणा भवन्ति प्रकटिताः ।

A store-house of evil is a woman if she is depraved.
"Beauty without virtue is a curse."

दुराचारपरा नारी सर्वदोषास्पदं परं ।
"धिक् सौन्दर्यं गुणहीनम् ।"

A too quick return of an obligation is a sort of ingratitude

उपकृतस्य झटिति प्रतिशोधनमकृतज्ञतायामेव पर्यवस्यति ।

A troubled heart is a worm to the bones.
"Care brings on grey hairs
"And age without years"

चिन्तायुक्तं चेतोऽस्थिकीटम् ।
"चिन्तया केशशौक्ल्यं स्यादकाले च जरागमः ।"

A wealthy traveller fears an ambush, empty pockets journey on in safety.

विभेति धनवान्पान्थो कुञ्जादपि । अकिञ्चनो निर्भयं व्रजेत् ।

A wheel not greased will creak.

"They who are not properly paid will not work without grumbling" SHAKS

चक्रं कून्दत्यतैलकम् ।

"अयुक्ते वेतनं प्राप्य कार्यं खिन्नं करिष्यति ।"

A wilful fault has no excuse and deserves no pardon.

ज्ञानपूर्वकानुष्ठितस्यापराधस्य परिहार: क्षमा च नास्त्येव।

A wise man aims at nothing out of his reach.

अप्राप्यमिह यद्वस्तु तन्नेच्छन्ति मनीषिणः।

An acute word cuts deeper than sharp weapon

निशितशस्त्रापेक्षया मर्मभिद्वाक्यमधिकत्ताय भवति ।

An angry man is again angry with himself when he returns to reason

क्रोधतोऽन्तर्मुखस्संभूय एवात्मने क्रुध्यति ।

An ass is but an ass though laden with gold.

गर्दभः सुवर्णभारं वहन्नपि गर्दभ एवास्ति ।

An evil lesson is easily learned.

दुःशिक्षा अनायासेनाधिगन्तुं शक्या ।

An excess of hoarded wealth is the death of many.

वहूनां जायते मृत्युरेकस्येहातिसञ्चयात् ।

An honest man is hurt by praise unjustly bestowed.

प्रशंसयानुचितया व्यथते हि मनः सताम् ।

An ill man is worst when he appeareth good.

दुर्जनो यदा कृत्रिमां साधुतां प्रदर्शयति तदा स दुष्टतरो भवति ।

An ill wound may be cured but not an ill name

व्रणो विरोप्यते यत्नैर्न दुष्टं शोध्यते यशः ।

An injury forgiven is better than an injury revenged.

क्षमणं वरीयो वैरनिर्यातनापेक्षया ।

An old man in a house is a good sign.

गृहे वयोवृद्धावस्थितिः शुभचिह्नम् ।

An open door will tempt a saint.

द्वारे विघटिते लोभो भवत्येव मुनेरपि ।

An upright judge has more regard to justice than to men.

योग्यो विचारकः पुरुषमनपेक्ष्यैव न्याय-मनुसरति ।

An uncalled for defence becomes a positive accusation.

"He declares himself guilty who justifies himself before accusation"

अकाण्डे परिहारेच्छा दोषाणां तद्दृढीकृतिः ।

" प्रत्याख्यानात्स्वदोषाणामभियोगात्पुरो नरः ।

प्रख्यापयति दोषाणां भाजनत्वमिहात्मनः ॥ "

An unguarded speech reveals the truth.

"A fool's heart dances on his lips"

वचसाऽनवधानेन सत्यं वस्तु प्रकाश्यते ।

"मूर्खस्य हृदयं वाचि ।"

An ungrateful man is a tub full of holes

पात्रेण बहुरन्ध्रेण कृतघ्नः सदृशो मतः ।

Actions from youth, advice from the middle-aged, prayers from the aged.

कार्यं तरुणाच्छिक्षा वयोऽधिकादाशिषश्च वृद्धेभ्यः ।

Admonish your friends in private, praise them in public.

श्लाघ्याः सभासु सुहृदः शिक्षणीया रहः पुनः ।

Auger and haste hinder good counsel.

क्रोधेन त्वरया च समीचीन उपदेशस्तिरो-
धीयते ।

As the yellow gold is tried in the fire, so is sincerity tested in adversity.

यथा पीतं सुवर्णमग्नौ परीक्ष्यते तथा
सन्मैत्री आपत्काले ।

As you sow, you shall reap.

यद्वप्स्यसि तल्लविष्यसि ।

As the sword of the best tempered metal is most flexible, so the truly generous are most pliant and courteous in their behaviour to their inferiors.

सद्द्रव्यो नमति यथा सुखेन खड्गो यथार्थो-
दारचरितास्तथैव नम्रा अधरेषु ।

Attempt nothing beyond your strength.

अयथाशक्तियत्नो न कार्य्यः ।

A wise man begins in the end, a fool ends in the beginning.

व्युत्पन्नचेताः परिपाकमवधार्यारभते मूर्ख-स्तु कार्यमारभ्य व्यापादयति ।

A wounded reputation is seldom cured.

क्षता प्रतिष्ठा दुःखेन शुद्धिमारोप्यते पुनः ।

Backbiting oftener proceeds from pride than malice.

पैशुन्यं प्रायेणाहंकारान्न तु द्वेषात्प्रवर्त्तते ।

Bad customs are better broken than kept up.

असद्व्यवहारसंरक्षणापेक्षया तदुत्सादनमेव वरीयः ।

Bare words buy no barley

न केवलं वार्त्तया यवाः क्रेतुम् शक्याः ।

Barking dogs seldom bite

भषमाणाः श्वा कदाचिदेव दशनान्यारो-पयति ।

Be bold but not too bold

साहसमवलम्बस्व न तु सीमातिशयि तद्भवेत् ।

Be cautious as to what you say of men, and to whom you speak it.

किं कस्य विषये कस्मै वदसीत्यवधारय ।

Be always as merry as you can, for no one delights in a sorrowful man.

यथाशक्यमात्मानं सुप्रसन्नं स्थापय यथा न कोऽपि जन उन्मनायितं निरीक्ष्य हर्षमाविष्कुर्यात् ।

Be always at leisure to do the good, never making business an excuse to decline the offices of humanity.

भद्रमनुष्ठातुं सदा लब्धावसरो भव कार्यान्तरातिपातमिषेण मनुष्यतानुरूपमाचरणं मा हासीः ।

Be ever vigilant but never suspicious

सर्वदा सावधानो भव शङ्कितमनास्तु मा भूः ।

Be loving and you will never want for love, be humble and you will never want for guiding.

सर्वेषां प्रेम तस्मिन्यः परेषु प्रेमवानिह ।
सर्वेभ्य उपदेशश्च तस्य यो विनयान्वितः॥

Be slow of giving advice, ready to do a service.

परामर्शदाने मा त्वरिष्ठाः साहाय्यदाने तु त्वरणीयम् ।

Be slow to promise, quick to perform.

सत्वरं न प्रतिज्ञेयं कार्यं साध्यं तु सत्वरम् ।

Be not too hasty to outbid another

परान्पराभवितुं मा त्वरिष्ठाः ।

Be not too brief in conversation, lest you be not understood, nor too diffuse lest you be troublesome

आलापंस्तादृशं संक्षेपं मा कृथा येन भवदाशयं परो न जानीयान्मा च विस्तृणीहि तथा यथा पीडाकरः स्याः ।

Beads about the neck and the devil in the heart

कण्ठे मालावलम्बन हृदि दुरनुष्ठानसन्निधिः ।

Beautiful things are secured with most difficulty.
"Finest gems lie deepest

संग्रहो रम्यवस्तूनामतिदुःखेन साध्यते ।
"महार्हरत्नानि वसन्त्यगाधे ।"

Bees that have honey in their mouths have stings in their tail.

मधुलिहां मुखे मधुमाधुर्यं पुच्छे तु कण्टकम् ।

Believe only half of what you hear of a man's wealth and goodness

परकीयधनस्य भद्रतायाश्च विषये यदाकर्ण्यते तदर्धं विश्वसनीयम् ।

Brevity is a great praise of eloquence.

वाग्मितायाः संक्षिप्ततैव प्रशंसा ।

Beware of him who regards not his reputation

अवधत्त तस्माद्यः स्वीयं यशो नाद्रियते ।

Birds of a feather flock together.

समानशीलव्यसनाः प्रायः संहन्यन्ते ।

Business may be troublesome, but idleness pernicious.

भूयात् क्लेशसहं कार्य्यमालस्यन्तु विनाशकम् ।

Buyers want a hundred eyes, sellers none.

क्रेतारो बहुचक्षूंष्यपेक्षन्ते पणितारस्तु नैकमपि ।

Buying a thing too dear is no bounty.

अधिकमूल्येन वस्तुक्रयणं नौदार्यमस्ति ।

By doing nothing we learn to do ill.

दुष्कर्म शिक्ष्यते तेन न किञ्चिद्योऽनुतिष्ठति ।

By *ignorance* we *mistake*, and by *mistakes* we learn.

अज्ञानेन भ्राम्यामो भ्रान्त्या च शिक्षां लभेमहि ।

By the wicked the good conduct of others is dreaded

दुर्जनानां सतां कार्याज्जायते सर्वदा भयम्।

By the familiarity of the master the servant is spoilt

"I amiliarity breeds contempt

स्वामिनो मैत्र्या भृत्यः प्रणश्यति ।

"अतिसान्निध्यं घृणाहेतुर्भवति" ।

Better a good dinner than a fine coat.

औपरिष्टिकपरिच्छदापेक्षया समीचीनोऽभ्यवहारो वरीयान् ।

Better a tooth out than always aching.

व्यथां ददतो दंतस्यापेक्षया तस्य निष्कासनं वरम् ।

Better an empty house than ill tenant.

वरं रिक्तं गृहं दुर्दान्तस्य भाटकिनोऽपेक्षया ।

Better be alone than in bad company.

दुःसङ्गादेकको वरम् ।

Better a barking dog than a sleeping lion.

स्वपतोऽपि भयं सिंहाद्रूपतोऽपि न कुक्कुरात् ।

Better late than never

सर्वथैवाननुष्ठानाच्चिरानुष्ठानमुत्तमम् ।

Better be ill spoken of by one before all than by all before one.

वरं यदेको बहूनां समक्षे दुर्व्यवहरेन्नत्वेकस्य समक्षे बहूनामभिशापः ।

Bettei face a danger once, than always be in fear

असकृद्भयशङ्कापेक्षया सकृद्भयसांमुख्यसंविधानं वरीयः ।

Better give a shilling than lend a half-crown.

सपादैकमुद्राऋणदानापेक्षया वरमष्टाणुक-प्रदानं कुरु।

Better say nothing than nothing to the purpose.

प्रयोजनहीनबह्वभिधानापेक्षयाऽनभिधानमेव वरम्।

Catch not at the shadow and lose the substance.

न कार्या वस्तुनो हानिश्छायामेवानु-धावता।

Careless shepherds make many a feast for the wolf

अनवहितोऽविरक्तको वृकस्य बह्वातिथेयं संविधत्ते।

Cautious in small matters, careless in great.

लघुविषयेषु सावधाना महत्सु च सप्रमादाः।

Cause not thine own dog to bite thee.

निजशुनात्मानं मा दंशय।

Cheat me in the price, but not in the goods.

प्रतारयत मां मूल्ये न तु वस्तुनि।

Clouds that the sun builds up darken him.

मेघाः सूर्य्याद्देव समुद्भवन्ति तमेव चावृणवते।

Come what may, all bad fortune is to be conquered by endurance

"Put a stout heart to a steep hill"

"Wise men never wail their woes" SHAKS

यत्किमप्यायातु दुर्भाग्यं सर्वं सहनशीलतया परिहर्त्तव्यम्।

"दृढं कुरुत हृदयं दुरारोहपर्व्वतं प्रति।"

"कदाचिदपि दुःखानि नानुशोचन्ति पण्डिताः।"

Common report is not always wrong.

सदा न भवति निर्मूला किंवदन्ती।

Concealed grudges are gangrenes in friendship.

आन्तरिको द्वेषो मैत्र्यां व्रणोऽस्ति।

Concealed anger is to be feared, but hatred openly manifested destroys its chance of revenge

"Fire that is closest kept burns most of all"

SHAKS

भयं क्रोधात्सुनिभृतात्प्रकाशिते च विद्वेषे प्रणश्यति वैरनिर्यातनशङ्का।

"आच्छन्नोऽग्निर्भृशं दहेत्।"

Confidence cannot find a place wherein to rest in safety.

विश्वासो न लभते स्थानं यत्र निःशङ्कं विश्राम्येत ।

Confession without repentance, friends without faith, prayer without sincerity are mere loss.

अनुतापरहितोऽपराधस्वीकारो विश्वासविधुरा मैत्री भक्तिहीना भगवदभ्यर्थना एतत्सर्वमेतैर्विना शून्यमेव ।

Confine your tongue lest it confine you.

स्वीयां वाचं निगृहाण यया त्वमनया न निगृहीतो भवेः ।

Consider how long the winter will last

" If you knew age would crave
" It would both get and save

कियच्चिरमवस्थेयं शिशिरेण विचिन्तय ।

"वार्द्धक्ये स्पृहणीयं यत्तच्चेज्ज्ञायेत पूर्वतस्तर्हि तत्संगृहीतञ्च रक्षितञ्च भवेदपि ॥"

Consider that an enemy may become a friend

रिपुरपि सुहृद्भवेदित्यवधारय ।

Consider well and very oft why thou camest into this world, and how soon thou must go out of it.

सदा मीमांसस्व सम्यकस्य हेतोरिह जगत्या-
यातोऽसि कथञ्च त्वरया गमिष्यसीति ।

Conscience cannot be compelled.

अन्तरात्मा प्रतिबाधितुं न शक्यः ।

Constant complaints never get pity.

शाश्वतिकोऽभियोगो न कदापि दयाविषयो भवति ।

Continual cheerfulness is a sign of wisdom.

शाश्वतिकः सुप्रसादो बुद्धेर्लक्षणम् ।

Counsel is irksome, when the matter is past remedy.

उपदेशो दुःखायैव विषयेऽचिकित्सतां गते ।

Courage consists not in hazarding without fear, but in being resolutely minded in a just cause.

निर्भीकतयातिसाहसिक्ये न शौर्यं परन्तु
यथार्थविषये दार्ढ्येनावस्थानमेव तत ।

Credit lost is like a broken glass.

पुंसां प्रनष्टो विश्वासो भग्नकाचसमो मतः ।

Credulity thinks others short-sighted.

अतिविश्वासशीलता परानदूरदर्शिनो मन्यते ।

Criminals are punished that others may be amended.

अपराद्धारः शास्यन्ते यतः परे समाहिता भवेयुः ।

Cut your coat according to your cloth, ask your purse what you shall spend

लब्धवस्त्रानुसारेण कञ्चुकं निर्मित्सत । कोषानुसारेण दित्सत ।

Dead men open living men's eyes

जीवतामिह नेत्राणि मृता उन्मीलयन्ति हि ।

Deception follows on the heels of deception.

' One falsehood leads to another
' One lie makes many '
' Oh! what a tangled web we weave
" When first we practise to deceive SCOTT

छलं छलानुबन्धि स्यात् ।

"अनृताज्जायतेऽनृतम्।"

"असत्यमेकं बहून्यनृतानि जनयति।"

"निपतेद्वञ्चनाजाले वञ्चयन्हि सकृन्नरः।"

Defaming and slandering others is the greatest of all sins.

परकीयदुर्यशस्करणमपवादश्च पापिष्ठतमम्।

Defiance provokes an enemy.

हुंकृतिः शत्रुमुत्तेजयति।

Deep rivers move in silence, shallow brooks are noisy.

अगाधनद्यः प्रवहन्त्यशब्दायमाना गाधाः पुनः शब्दायमानाः प्रवहन्ति।

Deliberate before you begin, but having done so carefully execute with vigour.

आरम्भात्पुरतः सम्यग्विचारय यथाशक्ति।
सुविचार्यैवमारब्धं सर्वशक्त्या समापय।

Depraved conversation will corrupt the best morals.

चरित्रमतिशुद्धञ्च दूष्येताश्लीलभाषणैः।

Despise not the weak, the gnat stings the eyes of the lion

Despise your enemy and you will soon be beaten

दुर्बल इति नावज्ञा सिंहस्याप्यच्चि दशति मशको हि ।

"यो लघु मन्यते शत्रुं ध्रुवस्तस्य पराभवः ।"

Dogs wag their tails not so much in love to you as to your bread

श्वा चालयति लाङ्गूलं प्रेम्णान्नस्य नरस्य न।

Do all you can to be good and you will be so

सर्वदा चेष्टस्व भद्रो भवितु त्वञ्च तथा भविष्यसि ।

Do not close your letter without reading it, nor drink water without seeing it

मा पत्रमावृथा अनधीत्य मा च पिवेर्जल-मनिरीक्ष्य ।

Do not all you can, spend not all you have, believe not all you hear, and tell not all you know

मा कुथास्तत्सर्वं यच्छक्नोपि मा च व्ययय

सर्वं यद्धारयसि मा विश्वसीस्सर्वं यच्छृणोपि
मा च भाषिष्ठाः सर्वं यज्जानासि ।

Do well and have well.

सम्यक्कुरु सम्यग्लभस्व ।

Do what you ought, and let come what may

कर्त्तव्यमर्थं कुरु भवतु च यद्भवेत् ।

Draw not your bow till your arrow is fixed.

धनुर्मा कर्पय यावच्छरो न संहितः ।

Drunkenness is a pair of spectacles to see the devil and all his works

दुष्टं दुष्टस्य कार्याणि च द्रष्टुमतिपान-
मस्त्युपनेत्रम् ।

Drunkenness turns a man out of himself, and leaves a beast in his room

पानेन मनुष्यतामपहाय पशुत्वमवलम्बते
जनः ।

Drunkenness is an egg from which all vices are hatched

मद्यपानात्प्रजायन्ते सर्वाणि व्यसनानि हि ।

Do not defer until to-morrow what you can do to-day.

श्वः कृते तन्न रक्ष्यं यत्कर्त्तुमद्यैव शक्यते ।

Early not late remedies are the most effective.

आशुकृतो न तु विलम्बेन प्रतीकारोऽधिकफलाय भवति ।

Eat to live, but do not live to eat.

प्राणरक्षार्थमभ्यवहर मा चाभ्यवहारायैव जीव ।

Either never attempt or else accomplish.

नरैर्न यत्नः कार्यो वा साध्यं वा कार्यमीहितम् ।

Empty vessels give the greatest sound

शून्यभाण्डताडनान्महाञ्छब्द उत्पद्यते ।

Error is always in haste

सदैव त्वरमाणः स्खलनशीलः ।

Even too much praise is a burden

अतिवेलं प्रशंसाऽपि भारायैव ।

Even the smallest spark shines brightly in darkness.

अतिस्वल्पोऽपि स्फुलिङ्गो नितरां तमसि प्रकाशमावहति ।

Even a fool sometimes speaks to the purpose.

मूर्खोऽपि संगतवाक् क्वचित् ।

Even to smile at the misfortunes of others is to do injury.

परेषां व्यसने हास्यमप्यनिष्टाय भवति ।

Every thing hath its time, and that time must be watched.

सर्वं वस्तु कालमपेक्षते स च वै कालः प्रतीक्षणीयः ।

Every man loves justice at another man's house; nobody cares for it at his own.

नीतिमन्यगृहे सर्वो वाञ्छत्यात्मन्युपेक्षते ।

Every calamity is to be overcome by endurance

धैर्येण सर्वा विपदो जेतव्याः ।

Every mad man considers every one else a mad man

उन्मत्तो मन्यते सर्वानुन्मत्तान्पुरुषान् भुवि ।

Expect nothing from him who promises a good deal.

तस्मात्किमपि नाशंसितव्यं यो बहु प्रतिजानीते ।

Experience teaches fools, and he is a great one that will not learn by it.

चिरन्तनोऽनुभवो मूर्खानपि प्रबोधयति।
येऽनुभवेऽपि नावबुध्यन्ते ते मूर्खतमाः ।

Extreme remedies are never the first to be resorted to

नान्तिमप्रतिकाराणामादावेव च सेवनम् ।

Face to face the truth comes out.

संमुखीनविचारे सत्यं निष्कृष्यते ।

Fair words and foul play cheat both young and old

अनुकूलवाक्यमनादृताचारश्च युनो वृद्धांश्च व्यामोहयति ।

False friends are worse than open enemies

प्रकाशशत्रुभ्यो मिथ्यासुहृदो निकृष्टतराः ।

Fame like a river is narrowest at its source and broadest afar off

मूले सङ्कुचिता नदीव महती दूरे च कीर्त्तिर्नृणाम् ।

Far from court far from care.

विवादव्यवहाराद्यावद्दूरे वर्त्तेत तावदेव चिन्तायाः ।

First deserve then desire.

आसादय योग्यतां ततोऽभिलषस्व ।

Faults are thick where love is thin.

बाहुल्यं तत्र दोषाणां यत्र वै प्रेम दुर्बलम् ।

Flatterers are the worst kind of traitors.

मिथ्याश्लाघिनो विश्वासघातकेष्वधमतमा भवन्ति ।

Flatterers haunt not cottages.

मिथ्याप्रशंसिनो नोटजेषु व्याप्रियन्ते ।

Flattery brings friends, but the truth begets enmity.

"Flattery sits in the parlour, when plain dealing is kicked out of doors"

"A friend's frown is better than a fool's smile"

मिथ्याप्रशंसा मैत्रीमावहति सत्यवचनं तु शात्रवमुत्पादयति ।

"आलापगृहे चाटुवाक् सत्याचारी गृहाद्बहिः।"

"वालिशस्य स्मिताच्छ्रेयान्भ्रूभङ्गः सुहृदां मतः॥"

Fools are always resolute to make good their own folly.

मूर्खाः सदा कृतसंकल्पाः स्वमूर्खतास्थापने ।

Fools and obstinate men make lawyers rich.

मूर्खा हठिनश्च वैवादिकसमर्थकान् धनवतः कुर्वन्ति ।

Fools are not to be convinced

दुर्मेधसश्छिन्नसंशयाः कर्तुमशक्याः ।

Feasting makes no friendship.

संभोजनं मैत्रीं नोत्पादयति ।

Fire will not put out fire, anger is not appeased by anger

न वह्निरग्निना शाम्येन्न रोषः सान्त्व्यते रुषा।

For whom does the blind man's wife paint herself ?

अन्धस्य भार्या कस्य हेतोर्मण्डनं कुर्यात् ।

For mad words deaf ears

बाधिर्यमवलम्बस्व उन्मत्तप्रलापे ।

Forewarned forearmed

पूर्वप्रबोधितः पूर्वसन्नद्धः ।

Forget others' faults by remembering your own.

स्वदोषान्स्मरन्परकीयान्विस्मर ।

For age and want save while you may,
No morning sun lasts a whole day

वार्द्धक्यायार्थाभावाय यावच्छक्तो धनमशेषय । प्रातःकालीनः सूर्यो यावद्दिनं न तिष्ठति ।

Friends should be judged by their acts, not their words

'He is my friend that succoureth me, not he, that pitieth me'

'Good words and no deeds are rushes and reeds"

कार्यैः परीक्ष्यते मित्रं न वाक्यैः केवलैः क्वचित् ।

" स वै मित्रं यः साहाय्यं नानुकम्पां करोति मे।"
" कार्यहानिं प्रियं वाक्यं तृणप्रायं मतं सताम् ॥"

Friendship and company are a bad excuse for ill actions.

सौहार्दं सङ्गतं चासत्परिहारः कुकर्म्मणाम् ।

Friendship the older it grows the stronger it is

मैत्री कालाभिवृद्ध्या दृढतरा भवति ।

Fortune when she caresses a man too much makes him fool

अत्यन्तं लालितो लक्ष्म्या मूर्खो भवति मानवः ।

Fortune favours the bold

"Bold resolution is the favourite of Providence
"Fortune gives her hand to a bold man
'Boldness in business is the first second and third thing "
' He that does not venture must not complain of ill luck

शूरस्य दैवमनुकूलम् ।

" दृढसंकल्पो विधेः प्रियः।"
" श्रीः साहसिने हस्तं ददाति ।"

"कार्येषु साहसं प्रधानमप्रधानञ्च।"

"साहसेन विहीनो यः कथं भाग्यं स निन्दति।"

From our ancestors come our names, but from our virtues our honours

पूर्वपुरुषादायाति वंशनामाथ सदाचारात्प्रतिष्ठा।

From prudence peace; from peace abundance.

विवेकेन शान्तिः शान्त्या समृद्धिः।

From what has taken place, we infer what is about to happen.

यज्जातं तर्क्यते तेन यदग्रे संभविष्यति।

From a bad paymaster get what you can.

गृह्यतां यत्किञ्चिदपि प्राप्तुं शक्यतेऽदातुः सकाशात्।

From small things a great heap is made.

"Little by little the bird builds its nest."
"Little and often fills the purse."
"Drop by drop fills the tub "

क्षुद्रैर्वस्तुभिर्महाराशिः।

"शनैः शनैर्निर्मिमीते स्वनीडं वै विहङ्गमः।"

" बिन्दुभिः पूर्यते द्रोणिः। "

" स्वल्पेन बहुवारेण पूर्यते धनभस्त्रिका।"

From his silence a man's consent is inferred.

"Silence gives consent"

मौनं सम्मतिलक्षणम्।

"मौनं ददाति सम्मतिम्।"

Give a thing and take again, and you shall ride in hell's wain.

नरो दत्तप्रतिग्राही ध्रुवं नरकमश्नुते।

God sells knowledge for labour, honour for risk.

ईश्वरः श्रमस्य विनिमयेन ज्ञानं साहसस्य च प्रतिष्ठां ददाति।

Gods alone know what kind of wife a man will have.

"Hanging and wiving go by destiny"

दैवमेव प्रजानाति कीदृग्भार्या भविष्यति।

" भाग्याधीनो विवाहश्च वधश्चापि भवेन्नृणाम्।"

Good mind good find

चेतःशुद्धौ स्वधिगमः।

Good nature, like a bee collects its honey from every herb, ill nature like a spider, sucks poison from the sweetest flowers

मधुकर इव सत्प्रकृतिर्मधु समाहरति समस्त-
वस्तुभ्यः ।
मर्कटकवदसत्प्रकृतिर्गरलं चूषयत्यतिमधुर-
वस्तुभ्योऽपि ।

Great *discomfort* arises from *too* hearty a supper, if you would enjoy a tranquil sleep let your supper be a light one

दुःखमत्यशनाद्रात्रौ सुनिद्रः स्वल्पभोजनः ।

Grief burns itself and flows away in tears.

"When the pot boils over it cooleth itself"

'A small tear relieves a great sorrow'

शोकः परिपूर्णश्चाश्रुरूपेण प्रवहति ।
"पात्रीयस्य चोद्धलनात्पात्रं भवति शीतलम् ।"
"अश्रुणो हि कणेनापि शोकस्य महतः शमः ।"

Harm watch harm catch

हानिमनुसन्धाय हानिपात्रं भव ।

Health is not valued till sickness comes

व्याधावनागते मूल्यं न स्वास्थ्यस्यावबुध्यते।

He gives twice who gives soon

द्विगुणं शीघ्रदानं स्यात्।

He is wise to no purpose, who is not wise to himself

निरर्थकं तस्य प्राज्ञत्वं यो न स्वविषये प्राज्ञः।

He is a wise man who accommodates himself to all circumstances

सर्वास्ववस्थासु सुखी मनीषी।

He may not thank at all who thanks when none are by

न दद्याच्च साधुवादान् शून्ये साधुवादान्ददत्।

He must of necessity fear many whom many fear

यस्मात्सर्वे बिभ्यति सततमसौ सर्वतो भयं वहति।

He is indeed a conqueror who conquers himself

Who reigns within himself and rules passions desires and fears is more a king MILTON

स एव विजयी येन विजित्यात्मा वशीकृतः।

"नृपतिः स विशेषेण स्वात्मन्येव प्रशास्ति यो ।
निगृह्णाति च वै तत्र रागान् कामान् भयं तथा ॥"

He is a miserable man whom none dares tell of his faults so plainly that he may understand his danger, and he that is incapable and impatient of reproof can never become friend to any man.

मन्दभाग्योऽयं जनः यं न कोऽपि तस्य दोषान् स्पष्टं वक्तुं साहसी भवति येन स निजं संकटं जानीयात् । न कस्यापि स मित्रं भवितुमर्हति यो न धिक्कारक्षम उद्विजते च धिक्कारात् ।

He that blows in the dust fills his own eyes.

धूलिं धमति यः स स्वनेत्रे एव पूरयति धूलिना ।

He that will eat the kernel must crack the nut.

फलमज्जां भोक्तुमिच्छन्फलास्थि त्रोटयेन्नरः ।

He that winketh with one eye and seeth with the other, I would not trust him, though he were my brother.

एकेनाक्ष्णा पश्यति योऽप्यपरं च निमीलति।
भ्रातापसौ यदि मम न मे विश्वासभाजनः॥

Help him who is willing to work, not him who shrinks from it.

उद्योगभाजः साहाय्यं कार्यं नैवालसस्य तु।

Hope is our only comfort in adversity.

आशैव परमं पुंसां विपत्कालेऽवलम्बनम्।

He may well be contented who need neither borrow nor flatter.

यस्य ऋणं चाटुकारं वा कर्तुमनावश्यकं तुष्ट एव सः।

He who holds out but a doubtful hope of succour to the afflicted, denies it.

यो हि पीडितमनिश्चितसाहाय्याशया समाश्वासयति स तत्साहाय्यकरणमेवानङ्गीकरोति।

He who lends his money to a friend is sure to lose both

ऋणं वितीर्य मित्राय मित्रं वित्तं च नाशयेत्।

He who knows not how to confer a kindness cannot justly ask for one

योन वेत्ति दयां कर्तुं कथं स प्रार्थयेद्दयाम्।

He who knows nothing doubts nothing.

न जानन्तीह ये किञ्चित्तेषां शङ्का न काचन।

He who knows not how to employ his leisure hath more cares on his mind than the most busy of busily engaged men.

महोद्योगादपि जनाच्चिन्ता तस्याधिका भवेत्।
यो न जानाति हि कथं स्वकालमतिवाह-
येत्॥

He who lives in a house of glass must not throw stone.

वसन् काचस्य भवने पाषाणं न क्षिपेद्बुधः।

He who lives by medical treatment has but a wretched life.

औषधैर्जीवितं यस्य दुःखार्त्तं तस्य जीवितम्।

He who assists the wicked will in time rue it.

"Save a thief from the gallows and he will be the first to cut your throat"

सहायको हि दुष्टानां कालेऽनुशोकमाप्नुयात्।

"यो रक्षति वधाद्दस्युमादौ तस्य शिरश्छिदेत्।"

He who meditates a crime secretly within himself has all the guilt of the act

"Man punishes the action, but God the intention"

BYRON.

पापानुष्ठानसमा निभृतं चिन्तापि पापानाम्।

"दण्डयन्ति नराः कार्यमीशः पापस्य चिन्तनम्।"

He who gets the better of an iracible temperament conquers his worst enemy.

यः स्वाभाविकीमुग्रतां निगृहीतवान् स महान्तं शत्रुं पराजितवान्।

He who seeks to terrify others, is more in fear himself.

परांस्त्रासयितुं वाञ्छन्नितरां त्रस्यति स्वयम्।

Honesty is the best policy

सत्यमेवोत्तमः पन्था।

Hope is a waking dream

आशा विनिद्रः स्वप्नो हि।

However exalted our position, we should not despise the powers of the humble.

"A little stone overturns a great cart"

"A little mouse will put the finishing stroke to a castle wall"

अत्युन्नतैरपि बलं न दीनानामुपेक्ष्यताम् ।

"महतः शकटस्यापि परीवर्त्तोल्पलोष्टकात् ।"

"दुर्गभित्तिपातेऽन्तिमाघातोऽल्पेन मूषकेणापि क्रियते ।"

How much of injustice and depravity is sanctioned by custom.

"That monster custom, who all sense doth eat of habits' devil"

कियत्यनीतिर्दुराचारता च प्रथयानुमोदिता भवेत् ।

"सा राक्षसी प्रथा या मतिं हरति पैशाचश्चाचारो यया ।"

I am recommending you to do what I should do myself.

उपदेश्यं तदन्यस्य कर्त्तव्यमात्मनश्च यत् ।

I do not know any rule so unexceptionably useful and necessary, in every part of life, as to

unite gentleness of manners with firmness of mind.

आचारः प्रशमोपेतः सङ्कल्पश्च दृढोऽनयोः ।
योगान्नास्त्यपरं किञ्चिन्नृणां श्रेयस्करं भुवि ॥

I give not gold for mere expectations.

आशायै न केवलायै सुवर्णं दीयते मया ।

Idleness is the sepulchre of a living man

आलस्यं जीवतो मृतिः ।

If rich, be not elated, if poor, be not dejected.

संपद्युल्लासं दैन्ये च विषादं मा कृथाः ।

If the time don't suit you, suit yourself to the time

समयो नानुकूलश्चेत्समयस्यानुगो भव ।

If they say you are good, ask yourself if it be true.

श्लाघ्यसे चेज्जनैः पृच्छस्वात्मानं वास्तवं नु तत् ।

If doctors fail thee, be these three things thy doctors, rest, cheerfulness and moderate diet.

चिकित्सकैस्त्यक्तस्त्रयमेताद्भिषजं मन्यतां वि-
श्रामं प्रसादं मिताहारश्चेति ।

If pride leads the van, beggary brings up the rear

धावत्यग्रेऽभिमानश्चेद्दारिद्र्यं पृष्ठतो भवेत् ।

If you will enjoy the fire, you must put up with the smoke.

अग्निसुखमनुभविष्यंश्चेद्धूमं सह ।

If you can be well without health you may be happy without virtue.

विनाप्यारोग्यं स्वास्थ्यं चेद्विना धर्मं सुखं तदा ।

If you pursue good with labour, the labour passes away, but the good remains; if you pursue evil with pleasure, the pleasure passes away, but the evil remains.

श्रमेण शुभमातिष्ठेच्छ्रमोऽपैति शुभं स्थिरम् ।
कृते सुखेन त्वशुभे सुखं यात्यशुभं स्थिरम् ॥

If you live according to the requirements of nature, you will never be in want; if according to the fashions of the world, you will never be rich.

यथावश्यकं जीवतश्चाभावो नैव ते भवेत् ।
लोकाचारानुसारी चेन्नैव त्वं धनिको भवेः ।

If you are capable of submitting to insult you ought to be insulted.

"There is a limit at which forbearance ceases to be a virtue"

तिरस्कारं सोढुं योग्यश्चेत्तिरस्कृतो भव ।

"अस्ति सीमा यतः परं सहनशीलता न धर्म्मः ।"

If you desire peace, be ever prepared for war.

"Arms carry peace"

शान्तिश्चेदिष्यते तिष्ठ युद्धार्थं सर्वदोद्यतः ।

"शस्त्रैः शान्तिरुह्यते ।"

Impotent fury rages powerless and to no purpose.

"Anger cannot stand without a strong hand"

"Anger without power is folly"

निःसत्वः क्रोधः शक्तिहीनं निष्प्रयोजनञ्च क्षोभते ।

"क्रोधो न क्षमते स्थातुं भुजेन बलिना विना ।"

"बलहीनः क्रोधो मूर्खता ।"

In doing what we ought, we deserve no praise,

because it is our duty.

का श्लाघा कार्यकर्म्मणः करणे धर्म एव हि सः ।

Industry is the fortune's right hand, and frugality is its left.

भाग्यस्य दक्षिणः पाणिः श्रमो वामोऽमितव्ययः ।

In misfortune we need help not lamentation.

"Sorrow will pay no debt"

साहाय्येन विपद्यर्थो विलापैः किं प्रयोजनम् ।

"न दीयते ऋणं शोकैः ।"

In nothing do men resemble the gods so much as in giving help to their fellow-creatures.

परोपकारान्नैवान्यद्देवैः साधारणं नृणाम् ।

In going abroad we change the climate, not our disposition.

"Send a *fool* to the market, and a *fool* he will return"

"If an ass goes a travelling, he will not come home a horse."

देशस्य न निसर्गस्य परिवृत्तिः प्रवासतः।
"आपणं प्रेषितो मूर्खो मूर्ख एव निवर्त्तते।"
"बहिर्गत्वा निवृत्तः स्याद्गर्दभः किं हयः क्वचित्।"

In time of prosperity, friends will be plenty, in time of adversity, not one among twenty.

समृद्धौ सुहृदः सर्वे विपत्तौ नैव कश्चन।

In the midst of our mirth some annoyance always arises *to* vex us

प्रमोदानां मध्ये पीड़यितुं बाधा जायत एव काचित्।

It is pleasant to have a large heap to take from.

ग्रहणं महतो राशेः सकाशात्भवेत्सुखाय।

It is the *duty* of a good *sportsman* to kill *game* freely, but not to kill all.

स्वैरं सन्मृगयुर्हन्ति मृगान्नैव तु सर्वशः।

It is the essence of good taste to do that which is consistent with our position

"That suit is best that best fits me"

आचार आत्मीयपदानुरूपो विवेकतालक्ष-
णमेतदेव ।

("वयसः कर्मणोऽर्थस्य श्रुतस्याभिजनस्य च ।
वेषवाग्बुद्धिसारूप्यमाचरन् विचरेदिह ॥")

"आत्मानुरूपो यो वेषः स सर्वोत्तम ईरितः ।"

It is the nature of the unfortunate to be spiteful and to envy those who are well to do.

"Base envy withers at another's joy,
"And hates that excellence it cannot reach"

घृणाऽसूया च सुखिषु दुर्भगानां निसर्गतः ।

"नीचासूयाऽन्यसुखे मूर्च्छति जुगुप्सते चाप्राप्यमुत्कर्षम् ।"

It is but a small merit to observe silence, but is a grave fault to speak of matters on which we should be silent.

"More have repented of speech than of silence"

मौनावलम्बनमल्पगुणो यत्र च मौनेन स्थातव्यं तत्रानधिकारचर्चा महादोषाय ।

"अपि वाचा न तु मौनेनानुशोचन्ति वै जनाः ।"

It is honourable to be accused by those who deserve accusation.

अभियोगो योग्यजनैः प्रतिष्ठैव नृणां मता।

It is difficult to persuade mankind that the love of virtue is the love of themselves.

धर्मरक्षात्मनो रक्षा दुष्प्रत्येयमिदं जनैः ।

It is not for a man in authority to sleep a whole night. Homer.

अधिकारिपुरुषार्थं नैतद्युक्तं यत्सर्वां रात्रिं स्वप्यादिति ।

It is a sheer folly to expect justice from the unprincipled.

विचारहीनान्न्यायाशा मूर्खत्वं केवलं स्मृतम्।

It is folly to live poor and die rich.

मूर्खता मृत्युसमये धनं दैन्यगतायुषः ।

It is a folly to waste labour after trifles.

महान्प्रयत्नः क्षुद्रस्य वस्तुनोऽर्थे हि मूर्खता।

It is a good horse that never stumbles and a good wife that never grumbles.

प्रशस्योऽपमश्वो यो न स्खलति साध्वी चासौ स्त्री या न खिद्यते।

It is, I believe, better to restrain the passion of youth by a sense of shame, and by conciliatory means than by fear.

"There is a great force hidden in a sweet command."

मन्ये सामोपचारैर्लज्जया वा यूनां दुर्भावनिग्रहः श्रेयान्न तु भिया ।

"मधुरेषु निदेशेषु निभृतं सुमहद्बलम् ।"

It is the fault of youth that it cannot restrain its own impetuosity.

"You can't put an old head on young shoulders."

यौवनस्य महान्दोषो यत्स्ववेगनिग्रहाक्षमः ।

"यूनः शिरोधरायां कः स्थापयेद्वृद्धमस्तकम् ।"

It is cruel to refer to those things which cause sorrow.

शोकावहानां वस्तूनां वर्णनं हि नृशंसता ।

It is far easier to begin a task than to finish it.

कार्यस्योपक्रमात्तस्य समाप्तिरिह दुष्करा ।

It is equally a fault to believe all men or to believe none.

"Trust, beware whom."

दोषः सर्वेषु विश्वासो न विश्वासोऽथवा क्वचित् ।

"कं विश्वसिसीति सावधानेन कार्य्यो विश्वासः।"

It is best to know the worst at once.

वरं सद्यो विपज्ज्ञानम्।

It is better to have a clear conscience, and be censured, than to have a bad one, and be flattered

विदूषितान्तःकरणाच्छ्लाघितात्सकलैरपि।
शुद्धान्तःकरणः श्रेयान्निन्दितोऽप्यखिलैर्जनैः॥

It is fair to derive instructions even from an enemy

शिक्षा प्राप्या रिपोरपि।

It is hard for an empty bag to stand upright.

न तिष्ठेदुन्नता रिक्तभस्त्रिका।

It is never too late to learn

चिरादपि वरं शिक्षा।

It is a disgrace to say one thing and think another; but how much more disgraceful to write one thing and think another.

मनस्यन्यद्वचस्यन्यन्नीचता परमा स्मृता।

मनस्यन्यच्च लेखेऽन्यत्तस्मादप्यतिनीचता ॥

It is a disgrace to be praised by those who *deserve no praise*

स्वयमश्लाघनीया ये तैः श्लाघा स्यात्त्रपावहा ।

It is not becoming to play the fox or to play upon both sides.

"May the man be damned and never grow fat,
"Who wears two faces under one hat."

शृगालधूर्तता निन्द्या निन्द्यः पक्षद्वयाश्रयः ।
"द्विजिह्वः पुरुषो नश्येत् ।"

It is a well known fact, dirt stinks more when stirred.

विक्षोभिताद्धि नितरां मलाद्गन्धः प्रसर्पति ।

It is a misery to be born, a punishment to live, and a trouble to die.

"*I wept when I was born, and every day shows why*"
"He that will have no trouble in this world must not be born in it"

दुःखं जननं जीवनं पुनर्दण्डयितमथ कष्टं मरणम् ।

"अहमरोदिषं यदा प्रादुरभूवमथ प्रत्येकदिनं बोधयति कस्य हेतोरिति ।"

"यो दुःखं नानुभविष्यतीह जगति स नात्र जायात् ।"

It is the back-bone of wisdom not to trust too hastily.

"If you trust before you try,
"You will repent before you die"

द्रुतं क्वापि न विश्वासो प्रज्ञामूलमुदीरितम् ।
"अपरीक्ष्यैव विश्वासः पश्चात्तापस्य कारणम् ॥"

It is not enough to be wealthy, for without moral wealth and character as well, our riches only make us more unhappy and dissatisfied than ever.

न केवलं धनवत्त्वं पर्य्याप्तम । यतो नीतिधनं सदाचारञ्च विनास्मत्संपत्तयोऽस्मान्नितरामसुखिनोऽसन्तुष्टाञ्श्च विदधति ।

It is not to be argued that the absence of a thing proves that it is useless.

अभाव एव वस्तुनोऽनुपयोगितायां प्रमाण-

मिति तु न तर्कयितव्यम् ।

Jest with an ass and he will flap you in the face with his tail.

रासभेन परीहासात्पुच्छाघातो हि लभ्यते ।

Jesting lies bring serious sorrows.

परिहासानृतैश्चापि शोकः संजायते महान् ।

Kings learn wisdom from associating with wise men.

मतिभाजो नरेन्द्राः स्युर्बुद्धिमद्भिः समागमात् ।

Kings play the fool, and the people suffer for it.

"The pleasures of the mighty are the tears of the poor."

सम्राजः कुर्वन्ति मूर्खतां प्रजास्ततोऽवसीदन्ति ।

"बलवतां क्रीडनकानि निर्बलानां भवन्त्यश्रुनिपाताः ।"

Keep yourself from the anger of a great man, from the tumult of a mob, from the man of ill fame, from a widow that has been thrice married, from a wind that comes in at a hole, and from a reconciled enemy.

महाजनकोपात्प्राकृतजनसंकुलाद्दुर्यशस्विन-
स्त्रिरूढधवायाः।
रन्ध्रागतवायोः प्रसादितशत्रोः सदा दूरे स्थे-
यम्।

Lend every man thine ears, but, few, thy voice

श्रुतिर्देयैव सर्वेभ्यः कस्मैचित्तु प्रतिश्रुतिः।

Let us be judged by our actions

कार्यैः परीक्ष्यामहे वयम्।

Let not the sun go down upon your wrath.

क्रुद्धस्यैव न ते भानुरस्तं गच्छेत्कदाचन।

Let not your expenditure exceed your income

आयान्नैवाधिको व्ययः।

Let not your right hand know what your left hand doeth.

"A fool carveth a piece of his heart to every one that sits near him"

करः करोति यद्वामस्तद्वोप्यं दक्षिणात्करात्।

"तिष्ठति य एव निकटे हृदयस्यांशं ददाति त-
स्मै मूर्खः।

Let him who has granted a favour speak not of it; let him who has received one, proclaim it.

कृत्वोपकारं न च तं वदेत्स्वयं प्राप्तोपकारश्च संघोषयेत्स्वयम् ।

Let but the hours of idleness cease, and the bow of cupid will become broken and his torch extinguished.

केवलं क्रियाहीनः समयो न भवेदथ मदनस्य धनुर्भज्यादुल्का च निर्वाणा भवेत् ।

Let justice be done, though the heavens fall.

न्यायं कुर्य्याद्यद्यपि सुरलोका निपतेयुः ।

Life consists not merely in existing but in enjoying health.

"He who has not health has nothing"

न केवलमस्तित्वे जीवनं परन्तु स्वास्थ्यसौख्ये एव ।

"नास्ति स्वास्थ्यसुखं यस्य न किञ्चित्तस्य विद्यते ।"

Life has its thorns, heed not their scratches

जीवनं कण्टकैर्युक्तं का चिन्ता तैर्भिदा यदि ।

Life is most enjoyed when courted least; most worth when disesteemed.

सुखमायुरकान्तममानितश्चातिमूल्यवत् ।

Lookers-on see more than players

नर्तकापेक्षया नूनं प्रेक्षकैर्दृश्यतेऽधिकम् ।

Many annoyances surround an aged man.

"Care keeps his watch in every old man's eyes."
SHAKS

वहुपीड़ापरिवृतो वृद्धः ।

"नेत्रयोर्वृद्धस्य चिन्ता जागरूका ।"

Many children, and little bread, is a painful pleasure

वहुप्रजा अल्पमन्नं सुखमेतद्दुःखसंयुतम् ।

Many will hate you, if you love yourself

"A man gains nothing by vain glory but contempt and hatred"

"He that boasteth of himself affronteth his company.'

आत्माभिलापी परैर्गर्ह्यः ।

"व्यर्थात्मश्लाघया नूनं घृणैव प्राप्यत नृभिः।"

"विकत्थते स्वान्गुणान्यः स परानवमन्यते ।"

Many fall by the sword, but more from gluttony

"Men dig their graves with their teeth"
"Hunger and thirst scarcely kill any,
"But gluttony and drink kill a great many."

OPINUS MEDICA.

पतन्ति युद्धे वहवस्ततोऽधिका वहुभोजनात् ।

"दन्तैर्खनन्ति स्वसमाधिगर्त्तं बहवो जनाः ।"

"पिपासया क्षुधा चैव नश्यन्ति कतिचिद्भुवि ।
अतिभोजनपानाभ्यां नश्यन्ति बहवो जनाः ॥"

Man's best candle is his understanding.

वुद्धिरेव मनुष्याणामुत्तमो दीपको मतः ।

Men worship the rising sun, not the setting sun.

"The rose is fairest when 'tis budding new"

SCOTT.

उद्यन्सूर्यः प्रपूज्यते नैवास्ताभिमुखः पुनः ।

"पुष्पमतीव सुन्दरं सद्यो विकसितं यदा ।"

Mildness governs better than anger.

प्रशास्यते मार्दवेन यथा नैव तथा रुषा ।

Mirth must be *indulged in to prepare the mind* for serious matters.

"A little nonsense now and then is relished by the best of men"

मनो गुर्वर्थवर्त्तनक्षमं कर्त्तुं प्रमोदः कार्य्यः ।
"अल्पं निरर्थकाचरणं यदा कदा रोचते उत्त-
मेभ्यो जनेभ्यः ।"

Misfortunes make happiness more sweet when it comes

"Pain past is pleasure"
"Pain is forgotten where gain comes '

यदैवोपनतं दुःखात्सुखं तद्रसवत्तरम् ।
"गतं दुःखं सुखञ्च तत् ।"
"लाभाद्दुःखस्य विस्मृतिः ।"

Money is the sinew of love, as well as of war

प्रीतेश्च कलहस्यापि सूत्रं धनमुदीरितम् ।

More credit may be thrown down in a moment, than can be built up in an age

यावती प्रतिष्ठा महता कालेन स्थाप्यते ततोऽधिकापि क्षणकालेन प्रक्षेप्तुं शक्यते ।

Nature has placed his own happiness in each man's hand, if he only knew how to use it

' Ourselves to ourselves the cause of ill

प्रत्येकहस्ते तस्य सुखवस्तु दैवेन नि-
हितमेव यदि स जानीयात्कथं प्रयुज्यत
इदम् ।

"अस्मदीयदुःखहेतुर्वयमेव ।"

Neither seek nor despise honour.

नान्वेषणीया नोपेक्ष्या प्रतिष्ठा मनुजैरिह ।

Neither shall the wave, which has passed on ever be recalled; nor can the hour, which has once fled by return again.

"Time and tide wait for no man"

नागच्छेच्च गता वीचिर्नायाति समयो गतः।

"कालः सागरवेला वा न कञ्चिद्धि प्रतीक्षते।"

Nobility of conduct is a greater recommendation than nobility of birth.

"From our ancestors come our names, but from our virtues our honours."

आभिजात्यापेक्षया स्वाचरणमहत्त्वमेवाधि-
कं योग्यतानिदर्शनम् ।

"पूर्वजाद्गोत्रसम्प्राप्तिः ख्यातिस्त्वात्मकृताच्छु-
भात् ।"

No day should pass without something being done.

"Every day in thy life is a leaf in thy history,
"Catch then, O! catch the transient hours,
"Improve each moment as it flies." JOHNSON.

नैकमपि दिनमकिञ्चित्कुर्वाणस्य गच्छेत् ।

"भवतो जीवने प्रत्येकं दिनं पत्रमेकं भवदीयेतिहासे ।
"तस्माद्गृहाण तच्चपलं क्षणम् ।
"संस्कुरु च प्रत्येकं क्षणं यावत्तत्पलायते ।"

No deceit is so veiled as that which lies concealed behind the semblance of courtesy.

"Full of courtesy full of craft"

विनयाभासप्रच्छन्नाच्छलान्नाधिकं व्यवहितमन्यच्छलम् ।

"अतिविनयेन पूर्णश्छलेन पूर्णः ।"

No gift better than advice.

उपदेशात्परं दानमधिकं नैव विद्यते ।

No man is so old, but thinks he may live another year

अतिवृद्धोऽपि पुरुषोऽपरं वर्षमेकं जीवे-
दिति मन्यते ।

No man is so rich as to say, I have enough.

न कश्चिदेवं धनिको यः स्वीयं विभवमल-
मिति मनुते ।

No man will revel long in the indulgence of crime.

"It is hard to see an old tyrant"

पापाचरणे न कोऽपि चिरं प्रमुदितो भवि-
ष्यति ।

"चिरन्तनोपद्रवी विरलं दृश्यते ।"

None so blind as those who will not see.

न कामयेत यो द्रष्टुं तस्मादन्धतरो नु कः ।

Nor am I ashamed, as some are, to confess my ignorance of those matters with which I am unacquainted.

यद्विषये न परिचयस्तस्याज्ञानप्रकाशने त्रपा
न मे यथा केषाञ्चित् ।

Nothing is more obnoxious than a low person raised to a high position

"No pride like that of an enriched beggar"
"The more riches a fool hath, the greater fool he is"
"The higher the monkey goes the more he shows his tail" SHAKS

एतस्मादधिकं किंचिन्नास्ति लोके जुगुप्सितं ।
यत्पदे महतां योग्ये नीचानामधिरोहणम् ॥

"गर्व्वस्तादृङ्न चान्यत्र यादृङ्नीचे समुन्नते।"
"मूढस्त्वधिकसम्पत्तिं प्राप्य मूढतरो भवेत्।"
"यथोर्ध्वं प्रसरेत्कीशस्तथा पुच्छं प्रदर्शयेत्।"

Nothing moves more quickly than scandal

"For evil news rides post, while good news baits" MILTON

जनापवादादधिकं शीघ्रगामि न विद्यते ।

"दुर्वार्त्ताः शीघ्रगा लोके ।
सद्वार्त्तास्तु विलम्बिन्यः ॥"

Of four things every man has more than he knows,—of sins, of debts, of years and of foes

पापम् ऋणं वयश्च शत्रुश्चेति वस्तुचतुष्टयस्य यावत्प्रायो जनो जानाति तदधिकं तस्यास्ति ।

Obstinately to justify a fault is a second fault

हठेन स्वापराधानङ्गीकार एव द्वितीयोऽपराधः ।

One eye-witness is better than ten hearsays.

एकश्चाक्षुषः प्रमाणः दशसंख्याकजनश्रुतिभ्यो गरीयान् ।

One man's fault is another man's lesson.

एकस्य स्खलनादन्यः शिक्षामाप्नोति पुरुषः।

One man is no man.

"A man is nothing without the aid of others"
"Two heads are better than one"

एको जनो न कोऽपि जनः ।

"परेषां सहायहीन एको न किमपि ।"
"एकस्य बुद्धेर्द्वयोर्बुद्धिर्वरीयसी ।"

One father can support ten children; ten children cannot support one father.

पिता पायाद्दश सुतान्न दशापि तु तं सुताः ।

One foe is too many and an hundred friends too few.

एकोऽप्यनेकः शत्रुः स्याच्छतञ्च सुहृदोऽ-

ल्पकाः।

One sword keeps another in its scabbard.

निधापयति कोपान्तः खड्गः खड्गान्तरं किल।

Orators are most vehement when they have the weakest cause, as men get on horse-back when they cannot walk.

वाग्मिनो वाग्मिता गुर्वी दुर्बले पक्ष आश्रिते।
पद्भ्यां गन्तुमशक्तोऽश्वमारोहति यतो जनः॥

Our liberality should not exceed our ability

औदार्यं नाधिकं शक्तेः।

Our pleasures are imagined, but our griefs are all real.

सुखमुत्प्रेक्षितं सर्वं दुःखं सर्वं तु वास्तवम्।

Pardon is the glorious kind of revenge.

क्षमोत्कृष्टा प्रतिक्रिया।

Past labour is present delight.

भूतः परिश्रमो वर्त्तमानं सुखम्।

Patience is bitter, but its fruit is sweet.

धैर्यं कटु भवेत्किन्तु तस्यास्ति मधुरं फलम् ।

Peace flourishes when reason rules.

शान्तिः प्रवर्धते यदा विवेकस्य प्रशासनम् ।

Pleasant words are valued and do not cost much.

प्रिया वाक् शास्यते सर्वैर्व्ययश्चात्र न कश्चन ।

Practical jokes belong only to the low classes.

कार्यपरिणतःपरीहासो नीचेष्वेव प्रवर्त्तते ।

Presents are more burdensome than profitable

न तथा लाभ उपहारेभ्यो यथा ते भाराः ।

Prevention is better than cure

प्रतिकाराद्वरं रोधः ।

Procrastination is the thief of time.

कालापहर्त्री दीर्घसूत्रता ।

Punctuality is the soul of time.

यथासमयमनुष्ठानं कालस्य जीवनम् ।

Put no faith in tale-bearers.

परनिन्दाप्रवीणेषु विश्वासो न विधीयताम्।

Put not a naked sword in a mad man's hand

असिं विकोशमुन्मत्तहस्ते दद्याः कदापि न।

Reckless youth makes rueful age

प्रमत्तं यौवनमनुतापार्त्तं करोति वार्द्धक्यम्।

Relationship produces envy

ईर्ष्या सम्बन्धतो भवेत्।

Repentance is the heart's medicine

पश्चात्तापो हृदौषधम्।

Retirement without literary amusements is death itself and a living tomb

विद्याविनोदहीनो हि विश्रामो मृत्युरेव वै।

Sad hours seem long

दुःसमयश्चिरेण याप्यते।

Secrecy is the soul of all great affairs

गोपनं सर्वेषां महारम्भाणां जीवभूतम्।

Seek peace and ensure it

शान्तये चेष्टस्व प्रयतेथाश्च तत्स्थितये।

Seek not the luxuries of life lest you reap sorrow

विलासं मा वै कांक्षस्व यतो दुःखं न ते भवेत् ।

Selfishness has no eyes

स्वार्थान्धस्य कुतो दृष्टिः ।

Seven hours' sleep is enough for the young and the aged

सार्द्धसप्तदशघटीमिता निद्रा यूनां च वृद्धानाञ्च पर्य्याप्ता ।

Sing not of triumph before the victory

' Boil not the pap before the child is born

न गीयतां जयात्पूर्वं जनैर्विजयगीतिका ।

"प्रसूतापथ्यपाकः स्यात्किमर्थं प्रसवात्पुरः ।"

Sit in your own place, and no one can make you rise

उपविष्टो निजस्थाने केनाप्युत्थाप्यते नहि ।

Some things are better praised by silence than by remark

कस्यचिद्वस्तुनो वाक्यैः प्रशंसनान्मौनेनाधिकं प्रशंसनं भवेत् ।

So use your own property as not to injure that of another.

तथोपयोगः स्वधनस्य कार्यो हानिर्न कस्यापि यथाभ्युदेति ।

Sound conviction should influence us rather than public opinion

दृढस्वप्रत्ययाधीना न तावज्जनोक्तिनीता वयं भवेम ।

Spare the rod and spoil the child.

दण्डस्यानुपयोगेन बालो दुर्ललितो भवेत् ।

Spare when you are young and spend when you are old.

यौवने सञ्चयः कार्यः पुरुषैर्वार्द्धके व्ययः ।

Spendthrifts are always of necessity greedy and covetous.

मुक्तहस्ता नूनं शश्वल्लुब्धास्तृष्णाकुलास्तथा ।

Spend not where you may save, spare not where you must spend

यत्र रक्षा भवेत्साध्या तत्र कार्यो व्ययो न तु ।

यत्र व्ययः समुचितस्तत्र कार्यो व्ययो ध्रुवम् ॥

Submit to the rules you have yourself laid down.

स्वकृतनियमाः स्वयं पाल्याः ।

Success in crime always invites to worse deeds

दुष्प्रयत्नेषु साफल्यं दुष्प्रवृत्तिं प्रवर्धयेत् ।

Take care of the pence and the pounds will take care of themselves

पणानां रक्षणान्नूनं दीनाररक्षणम् स्वतः ।

Take the first advice of a woman and not the second

गृह्णीयात्प्रथमां शिक्षां न द्वितीयां तु योषिताम् ।

Tell me the company you keep, and I will tell you what you are

सहवासे परिज्ञाते ज्ञायते प्रकृतिर्नृणाम् ।

Temperance is the best physic

संयमान्नान्यदौषधम् ।

That man should be possessed of wealth who knows its proper use

जानात्यस्योपयोगं यः स एव धनमर्हति ।

That which is violent never lasts long.

"For violent fires soon burn out themselves" SHAKS

नातिचण्डश्चिरस्थायी।

"नाग्निश्चण्डश्चिरं ज्वलेत्।"

That is but an empty purse that is full of other men's money.

अन्यदीयैर्धनैः पूर्णः कोषो रिक्तसमो मतः।

That which the fool does in the end, the wise man does at the beginning.

अन्ते करोति यन्मूर्खस्तदादौ मतिमान्जनः।

The best throw of the dice is to throw them away.

अक्षप्रक्षेपणमेवाक्षस्य सुष्ठु चालनम्।

The brighter the moon shines the more the dog howls.

यथाधिकं विभातीन्दुः श्वा बुक्कति तथाधिकम्।

The act itself does not constitute a crime, unless the intent be criminal

अभिप्रायो न दुष्टश्चेन्न कार्यं दुष्यति स्वयम्।

The best manners are stained by haughtiness

गर्वेण शीलं हतम् ।

The best things are the first to perish.

"The roses fall, the thorns remain"

सर्वोत्तमानि वस्तूनि सर्वाग्रे च विनश्यन्ति ।

"पुष्पमाशु प्रपतति चिरं तिष्ठन्ति कण्टकाः ।"

The apprehension of approaching evil has hurried many into the utmost danger.

सन्निहितापद्भीत्यानेके द्रुतमपतन्घोरतमापदि ।

The face is the index to the mind.

मनस्सूचकं मुखम् ।

The fox loves cunning, the wolf covets the lamb, and a woman longs for praise

यथा छलप्रियः क्रोष्टा मेषशावप्रियो वृकः ।
तथैव सततं नार्यश्चाटुश्लाघाप्रिया भुवि ॥

The gain which is made at the expense of reputation should rather be set down as a loss.

यशःक्षयेण यो लाभः स हानिसदृशो मतः ।

The great wisdom in man consists in knowing his follies.

स्वमूर्खतापरिज्ञानं लक्षणं परमं मतेः ।

The best remedy against an ill man is much ground between both.

एकोऽसतां प्रतीकारोऽवस्थानमतिदूरतः ।

The hand often travels to the part where pain is.

प्रायो यत्र व्यथा तत्र नृणां पाणिः प्रसर्पति ।

The higher our position, the more modestly we should behave.

"The more noble the more humble"

"An insolent lord is not a gentleman"

"Arrogance is a weed that grows mostly on a dunghill"

यथोच्चं पदमस्माकं भूयास्म विनयी तथा ।

"यथाधिकोदारस्तथाधिको विनीतः ।"

"उद्धतोऽधिपो न भद्रः ।"

"औद्धत्यकक्षःप्रायःशकृन्निचयोपर्युद्भवति ।"

The human mind ever longs for occupation

"Pleasure and action make the hours seem short."

चित्तं सदा मनुष्याणां कार्योत्कण्ठासमाकुलम् ।

"अल्पोऽनुभूयते कालो भोगात्कार्याच्चिथा नृभिः ।"

The more virtuous a man himself is, the less does he suspect baseness in others

"Suspicion always haunts the guilty mind."
SHAKS.

यथाधिकः स्वयं साधुस्तथाल्पस्य परनीचताशङ्की ।

"सदा शङ्काऽपराधिनाम् ।"

The mob will now and then see things in a right light.

"A thing is never much talked of but there is some truth in it"

यदा कदापि प्राकृतजनाः सम्यक् पश्यन्ति विषयान् ।

"अनेकैरुच्यते यद्दै तत्र सत्यं भवेत्किञ्चित् ।"

(न ह्यमूला प्रसिद्धिः ।)

The mind that is anxious about the future is wretched.

"Let to-morrow take care of to-morrow."
"Leave things of the future to fate."

भविष्यच्चिन्ताभिभूतं मनो क्लिशितम् ।

"श्वो भावि श्वः समीक्षताम् ।"
"दैवाधीनं त्यजेद्भावि ।"

The more women look in their glasses the less they look to their houses

यथा यथा पश्यति दर्पणं स्त्री तथा तथा कार्यमुपेक्षते स्वम् ।

The most lasting monuments are doubtless paper-monuments

पत्रकृताः स्मारका एवातिचिरस्थायिनः ।

The more high-minded a man is, the more easily is his anger appeased.

यथा यथोदारतरो नरस्तथा तथास्य कोपस्त्वरितं प्रशाम्यति ।

The mind still longs for what it has missed, and loses itself in the contemplation of the past

"Can a mill go with the water that's past ?"

यन्नष्टं तदवाप्तये चित्तं सदा साभिलाषं भवति गतस्य चिन्तायाञ्चात्मानं नाशयति ।

"व्यतीतजलधारया किं जलचक्रिका गन्तुमर्हति ।"

The poor man seeks for food, the rich man for appetite.

दरिद्रो भोजनप्रार्थी क्षुधार्थी धनिको जनः ।

The proof of a woman is gold, of a man a woman

नारी परीक्ष्यते द्रव्यैः पुमान्नार्या परीक्ष्यते ।

The rack can extort a false confession from the innocent.

यातनाभिरदोषोऽपि दोषान्स्वीकुरुते नरः ।

The rust of the mind is the destruction of genius.

"The used key is always bright"
"Still water breeds vermin"

आलस्यं मानसं बुद्धेर्नाशनं परमं मतम् ।

"भासुरा कुञ्जिका कार्ये ।"
"स्थिरोदकं कृमिजनकम् ।"

The sandal tree perfumes the axe that fells it.

चन्दनतरुर्वासयति कुठारं स्वनिपातकम् ।

The test of merit is success.

"At the end of game you will see who is the winner"

साफल्यं गुणनिकषः ।

"क्रीडान्ते ज्ञायते जितं केन ।"

The remembrance of past pleasure adds to present sorrows.

"No greater grief than to remember days of joy when misery is at hand"

दुःखेऽतिदुःखं भवति भूतपूर्वसुखस्मृतेः ।

"नैतस्मादधिकं दुःखं यदागतप्रायदुःखे सुखदिनानुस्मृतिः ।"

The use of character is to be a shield against calumny.

सदाचारस्य कार्यं हि कलङ्काद्रक्षणं मतम् ।

The wise man is the master of his passions and a fool is their slave.

बुधः प्रभुः स्वकामानां तेषां दासस्तु बालिशः ।

The wolf changes his coat, but not his disposition.

चर्म स्वं न निसर्गं तु वृको हि परिवर्त्तयेत् ।

There is no gain so certain, as saving what you have.

प्राप्तवस्तुनः संरक्षणान्न कोऽपि ध्रुवतरो लाभः ।

There is this difference between happiness and wisdom, he that thinks himself the happiest

man really is so, but he that thinks himself the wisest is generally just the reverse.

सुखविवेकयोरयं भेदो यदात्मानं परमसुखिनं मन्यते यः स वस्तुतोऽप्येवं यश्चात्मानं परमविवेकिनं मन्यते स प्रायेण तद्विपरीतः ।

There are who despise pride with greater pride.

गरीयसेह गर्वेण गर्वं निन्दन्ति केचन ।

They can do least who boast loudest.

" Empty pitchers ring loudest."

ये जना बहु दृप्यन्ति तेऽत्यल्पकरणाक्षमाः ।

"घटे रिक्ते ध्वनिर्महान् ।"

They who worship God merely for fear, would worship the devil should he appear.

येऽर्चयन्ति भयादीशमाविर्भूतं पिशाचञ्च तेऽर्चयिष्यन्ति निश्चितम् ।

They that know least censure most.

अल्पज्ञा बहु दूषयन्ति ।

Things rumoured lessen in importance as they assume reality.

"The present fears are less than horrible imaginings."
SHAKS.

गुरुत्वं हीयते किंवदन्त्या यदा सत्यं प्रकाशितम्।

"उत्प्रेक्षिताद्भयादल्पं वर्त्तमानं भयं भवेत्।"

Things beyond our reach are not worth our consideration.

"What is high let that fly"

अचिन्तनीयं तद्वस्तु यत्प्राप्तुं नैव शक्यते।

"यदुच्चैस्तदुत्पतेत्।"

Their rise is one of difficulty whose merits are impeded by poverty.

"Fruit ripens not well in the shade"
"Slow rises worth by poverty depressed"
JOHNSON.

दुःखेन लभ्योन्नतिस्तेन दैन्यरुद्धा गुणा यस्य।

"अनातपे समीचीनः परिपाकः फलस्य न।"

"दैन्यावहितो गुणः शनैरुद्गच्छति।"

There is no accounting for tastes

"Every one to his liking"

न रुचौ कारणनिरूपणम्।

"भिन्नरुचिर्हि लोकः ।"

Those who plot the destruction of others often perish in the attempt.

योऽन्यनाशाय चेष्टेत प्रायः स नश्यति स्वयम् ।

Three know it, all know it; the secret of two is God's secret, the secret of three is every body's secret.

त्रयो जानन्ति तर्हि सर्वे जानन्ति । द्वयोर्गुप्तमीश्वरस्य गुप्तं त्रयाणां गुप्तं न कस्यापि गुप्तम् ।

Though they don't want to kill any body, they like to have the power to do so

यद्यपि केचन कमपि हन्तुं नेच्छन्ति तथापि सर्व्वे एवात्मनस्तत्सामर्थ्यमभिलषन्ति ।

To conceal disease is fatal.

"A disease known is half cured"

रोगगोपनं घाताय भवति ।

"ज्ञातरोगोऽर्धोपशान्तः ।"

To disregard money on suitable occasion is often a great profit.

" He that repairs not a part builds all "

धनोपेक्षा यथाकाले प्रायो लाभो महान्भवेत् ।

"यो न संस्कुरुते अंशं स पुनरसर्वमेव निर्मिमीते ।"

To condemn the error but not to descend to personalities

प्रमादस्य दूषणं न तु पुरुषविशेषाणां निन्दायामवतरणम् ।

To dismiss a guest is a more ungracious act than not to admit him at all.

अतिथेः प्रवेशरोधात्तस्य निष्कासनं कठोरतरम् ।

To enjoy happiness is a great good, but to be able to confer it also on others is a greater still.

सुखोपभोगोऽस्त्युत्तमस्ततोऽधिका च परसुखाय शक्तिरुत्तमा ।

To set a thief to catch a thief.

स्तेनद्वारैव स्तेनग्रहणम् ।

Tongue is not steel, but it cuts

नैव लौहमयी जिह्वा कर्त्तयित्री तथाप्यहो ।

Too much of any thing is bad.

सर्वस्यातिशयोऽनुत्तमः।

To preserve a friend three things are required; to honor him present, praise him absent, and assist him in his necessities.

मित्रस्य संरक्षणार्थं त्रयो व्यापारा अपेक्षिता यथा सम्मुखे तस्य प्रतिष्ठा परोक्षे च प्रशंसा यथावसरे तत्साहाय्यदानञ्चेति।

Towers are measured by their shades, and great men by their calumniators

छायया मीयते अट्टो महान्तो निन्दकैः पुनः।

True love never grows old

वास्तवं प्रेम न कदापि जीर्यते।

Truth becomes lost in the turmoil of arguments

वितर्कजाले लुप्यते सत्यम्।

Two things govern the world, woman and gold

नारि च सुवर्णञ्चेति द्वयं शास्त्यखिलं जगत्।

Unless your works lead to profit, vain is your glory in them.

कार्यं ते न लाभदं चेद्वृथैव तत्र गौरवम्।

Vulgarity of manners defiles fine garments more than mud.

पङ्कादतितरां ग्राम्यभावः स्याद्वेषदूषकः ।

War appears pleasant to those who have never experienced it.

"Nothing so bold as a blind man"

युद्धं नैवानुभूतं यैस्तेषां तत्सुमनोरमम् ।

"अन्धाच्छूरतरो नु कः ।"

We are not born for ourselves alone.

जन्म केवलमात्मार्थं नास्माकं जगतीतले ।

We must not expect everything, everywhere and from every body.

सर्वं सर्वत्र सर्वस्मान्नाशास्यमिह मानवैः ।

We should trust more to our eye-sight than to our ears.

"The eyes believe themselves, the ears other people"

श्रवे न तादृग्विश्वासो दृष्टौ स्याद्यादृशो नृणाम् ।

"अक्ष्णोरात्मनि विश्वासः परेष्वेव तु कर्णयोः ।"

We expiate in old age the follies of our youth.

"If you lie upon roses when young, you will lie upon thorns when old."

असमत्तारुण्यकृतदोषाणां प्रायश्चित्तं वार्द्धके जायते ।

"यौवने पुष्पशायी चेद्वार्द्धक्ये कण्टकोपरि ।"

What cannot be cured must be endured.

यस्य नास्ति प्रतीकारः सह्यमेव नरैर्हि तत् ।

What a man does by the agency of another is his own act.

कृतं प्रतिनिधिद्वारा यत्तत्स्वयमनुष्ठितम् ।

What the law will compel you to do, do of your free will.

यन्नियमो बलात्कारयिष्यति तत्स्वेच्छयैव क्रियताम् ।

Whatever you advise, be as brief as possible.

यथासंभवसंक्षिप्ता उपदेशा भवन्तु ते ।

Wear your learning like your watch in a private pocket, and do not pull it out and strike it merely to show that you have one.

निगूढामात्मनो विद्यां रक्षेन्नैव प्रकाशयेत् ।
वेशान्तर्घटीयन्त्रं न परान्दर्शयितुं यथा ॥

When an old dog barks, then look out

वुकेचेद्वृद्धशुनको द्रष्टव्यं मनुजैर्बहिः ।

When good cheer is lacking, false friends will be packing

प्रमोदोत्सवाद्यनुपस्थितौ नृणां भवन्ति मिथ्यासुहृदः पराङ्मुखाः ।

When the war is raging the laws are dumb

नियमा न युद्धे विजृम्भमाणे ।

When the mischief is done the door is shut.
' Too late to grieve when the chance is past

हानावनुष्ठितायां वै द्वारं प्रायः पिधीयते ।
"वृथा शोकोऽवसरे गते ।"

When jealousy begins to live, friendship begins to die

यदाऽसूया प्रजागर्ति सौहृदं नश्यति द्रुतम् ।

When they cannot win fair fight, they resort to all sorts of sly tricks

अशक्तो धर्मविजये छलं स्वीकुरुते नरः ।

When you can avoid it, never seek strife

तावत्परिहर कलहं परिहर्तुं शक्यते यावत् ।

When we have gold we are in fear, when we have none we are in danger.

भयं स्वर्णस्य सत्वे स्यादसत्वे तस्य संकटम् ।

Whenever you see a fellow-creature in trouble, remember that he is a man.

मनुष्यं विपन्नं दृष्ट्वैव स्मर्यतां यत्सोऽपि मानवः ।

Where ignorance is a bliss it is folly to be wise.

अज्ञानं सुसुखं यत्र वैदुष्यं तत्र मूर्खता ।

Where there are many counsellors there is safety.

यत्र बहवः परामर्ष्टारः सन्ति तत्र मङ्गलम् ।

Who paints me before, blackens me behind.

पुरः प्रशंसको नूनं परोक्षे निन्दको भवेत् ।

Why will no man confess his fault, because he continues to indulge in them, a man cannot tell his dream till he wakes.

स्वीकरोति न कथं निजदोषान्यतो नेच्छति
तान्परिहर्तुम् ।
प्रवुध्यते न हि जनः खलु यावत्स्वप्नवृत्तमिह
नाह स तावत् ॥

With the idle it is always holiday time

सर्वदालसचित्तानामनध्यायमहोत्सवः ।

Yes and no are very easily said, but before they are said, it is necessary to think a long time

वक्तुं वाढं न वेत्येवं सुकरं सर्वमानवैः ।
किन्तु तत्कथनात्पूर्वं विचारोऽपेक्षितो महान्॥

You have left the sheep with the wolf for safe custody

वृकस्य निकटे त्यक्ता रक्षणार्थमविस्त्वया ।

You know not what the evening may bring with it

No one knows what will happen to him before sun set

No one knows what a day may bring forth

सायङ्काले भवेत्किंवा न ज्ञायते त्वया किल ।
“ सूर्यास्तात्प्राक्किं नु भवेन्नैव जानाति कश्चन । ”

" कस्मिन्दिने किं भविता तन्न जानाति मानवः । "

You must endure what is painful to secure that which is profitable.

" He who would catch fish must not mind getting wet "

संग्रहो यस्य लाभाय दुःखं सहेत तत्कृते ।

" क्लेदाक्षयं कथं पुंसः स्यान्मत्स्यग्रहणार्थिनः । "

Young folks tell what they do, old ones what they have done and fools what they intend to do.

कृतं वदन्ति स्थविराः क्रियमाणं तु बालिशाः ।

कर्तुं यच्चिन्तितं तत्तु मूर्खैरेव प्रकाश्यते ॥

Your knowing of a thing is nothing, unless another knows you know it

वस्तुज्ञानं वृथा तत्र यावत्ते ज्ञानमन्यो न जानाति ।

—— o ——

PRINTED BY THAKUR DAS, MANAGER, TARA PRINTING WORKS, BENARES

Not to be Issued

Not to be Issued